पञ्चमः पाठः

# संसारमोहः



एकदा भगवान् नृसिंहः स्वस्य प्रियं भक्तं प्रह्लादम् अवदत्- '-किमपि वरं याचस्व' इति। तदा प्रह्लादः उक्तवान्- "भगवन्! संसारस्य एतान् दीनदुःखिनः जीवान् त्यक्त्वा अहम् एकाकी मुक्तः भवितुं न इच्छामि। कृपया भवान् एतान् सर्वान् अपि जीवान् स्वीकृत्य वैकुण्ठं प्रति गमनाय अनुमतिं ददातु" इति।

भगवान् अवदत्- ये गन्तुं न इच्छन्ति तान् सर्वान् अपि जीवान् बलपूर्वकं वैकुण्ठं कथं नयेत् भवान् ?

प्रह्लादः अवदत्- ईदृशः को भविष्यति यो वैकुण्ठं गन्तुं न इच्छेत् ? तर्हि त्वमेव सर्वान् पृष्ट्वा ये वैकुण्ठं गन्तुम् इच्छन्ति तान् स्वीकृत्य आगच्छ इति असूचयत् देवः। ततः प्रह्लादः प्रच्छनार्थं गतवान्।

ब्राह्मणाः उक्तवन्तः- इदानीं यजमानस्य यागः करणीयः अस्ति। किञ्च पुत्रः गुरुकुलं गतवान् अस्ति, यदा सः गुरुकुलतः आगमिष्यति तदा विवाहः कारणीयः अस्ति। अतः वयम् इदानीं वैकुण्ठं गन्तुं न अभिलषामः इति।

परिव्राजकाः उक्तवन्तः- वयं तु मुक्ताः एव स्मः। किन्तु शिष्याणां तत्वज्ञानं न जातम् अस्ति। अतः ते उपदेष्टव्या सन्ति अस्माभिः इति। एवम् एव राजानः राज्यस्य विषये, वणिजः वाणिज्यविषये, सेवकाः गृहविषये च उक्तवन्तः। पशु-पक्षिणः अपि स्वस्य परिवारपोषणे रताः आसन्। एवं सर्वे अपि प्राणिनः प्रह्लादेन सह वैकुण्ठं प्रति गमनं तिरस्कृतवन्तः। यद्यपि वैकुण्ठं सर्वेऽपि इच्छन्ति स्म एव, तथापि झटिति गमनाय कोऽपि उद्युक्तः न आसीत्। प्रह्लादः अन्ते एकस्य वराहस्य समीपं गतवान्। तदा वराहः अपृच्छत्- वैकुण्ठे किम् अस्ति? इति। प्रह्लादः अवदत्- तत्र अनन्तः आनन्दः अस्ति इति।

वराहः पुनः अपृच्छत्- मम भार्यां पृच्छतु, अहं तु एकाकी गन्तुं न इच्छामि।

तदा प्रह्लादः अवदत्- तर्हि तान् बालकान् च आदाय चलतु।

वराहस्य पत्नी वैकुण्ठगमनप्रस्तावं श्रुत्वा पृष्टवती- किं तत्र अस्माभिः भोजनं प्राप्यते ?

प्रह्लादः अवदत्- तत्र तु बुभुक्षा एव न भवति। अतः भोजनस्य समस्या नास्ति तत्र। तदा सूकरी अवदत्- यत्र बुभुक्षा न भवति तत्र गत्वा वयं रुग्णाः एव भवेम।

"तत्र कोऽपि कदापि रुग्णः न भवति" इति विवृतवान् प्रह्लादः।

तदा सूकरी दृढस्वरेण अवदत्- यत्र अस्माभिः भोजनं न प्राप्येत तं देशं वयं गन्तुं न इच्छामः"।

प्रह्लादः निराशतां प्राप्य भगवतः समीपं गत्वा उक्तवान्- भगवन्! सर्वेऽपि प्राणिनः स्वस्य एव कौटुम्बिकव्यापारे मग्नाः सन्ति। वैकुण्ठं गन्तुं कोऽपि उद्युक्तः नास्ति"।

## अभ्यासः

1. अनया कथया कः सन्देशः प्राप्यते?
2. संसारस्य मोहः कीदृशः भवति?
3. संसारस्य मोहः कथं वैकुण्ठस्य मार्गेऽपि बाधकः अस्ति?

★★★